"ज्ञात्वा तु तन्महाप्राज्ञः काव्यं रामायणाह्वयम्"।)
अष्टादशव्यवहारपदान्तर्गतो व्यवहारविशेषः।
यथाह मनुः अष्टमे। ८।५।६।७। "तेषामाद्यमृणा-
दानं" इत्युपक्रम्य। "स्त्रीपुंधर्म्मो विभागश्च द्यूत-
माह्वय एव च"।)
आह्वा, स्त्री, (आह्वानमिति। आङ्+ह्वे+अङ्।)
नाम। संज्ञा। इत्यमरः॥
आह्वानं, क्ली, (आङ्+ह्वे+भावे ल्युट्।) आवा-
हनं। डाका इति भाषा। तत्पर्य्यायः। हूतिः २
आकारणं ३। इत्यमरः॥ (यथा मनुः ९।१२६।
"जन्मज्येष्ठेन चाह्वानं सुब्रह्मण्यास्वपि स्मृतम्"।)
(आह्वयतेऽनेन। करणे ल्युट्।) नाम। इति शब्द-
रत्नावली॥

इ

इ, इकारः। तृतीयस्वरवर्णः। अस्योच्चारणस्थानं
तालु। स च ह्रस्वो दीर्घः प्लुतश्च भवति।
(अयञ्च उदात्तानुदात्तस्वरित-भेदात् त्रिविधः।
अनुनासिकाननुनासिकभेदाच्च प्रत्येकं द्विविधः
एतेन षड्विध एव।)
"इकारं परमानन्दसुगन्धकुसुमच्छविम्।
हरिब्रह्ममयं वर्णं सदा रुद्रयुतं प्रिये॥
सदा शक्तिमयं देवि गुरुब्रह्ममयं तथा।
सदाशिवमयं वर्णं परं ब्रह्मसमन्वितम्॥
हरिब्रह्मात्मकं वर्णं गुणत्रयसमन्वितम्।
इकारं परमेशानि स्वयं कुण्डली मूर्त्तिमान्"॥
इति कामधेनुतन्त्रम्॥ (वङ्गीयभाषायां।)
तस्य लेखनप्रकारो यथा,
"ऊर्द्ध्वाधः कुञ्चिता मध्ये रेखा तत्सङ्गता भवेत्।
लक्ष्मीर्व्वाणी तथेन्द्राणी क्रमात्तास्वेव संवसेत्॥
शीर्षाधःकुञ्चिता रेखा दक्षोर्द्ध्वा कामरूपिणी।
मायाशक्तिः कोणयुता ध्यानमस्य प्रचक्ष्यते"॥
इति वर्णोद्धारतन्त्रम्॥*॥ (यद्यपि सिद्धान्त-
कौमुद्यां "इचुयशानाम् तालु" इति सामान्यतः
उक्तं तथापि शब्देन्दुशेखरादिग्रन्थेषु विस्तरतो
विवृतिरुक्ता। यथा,—"तुल्यास्य प्रयत्नमिति
सूत्रेण प्रशब्देन विलक्षणयत्नबोधेऽपि लोके
यत्नप्रयत्नयोः पर्य्यायतेति ध्वनयन्नाह प्रयत्नो
हि द्विधा इति क्वचित् यत्नो द्विधेत्येव पाठः।
एतेषां आभ्यन्तरत्वं वर्णोत्पत्तेः प्राग्भावित्वात्।
तथाहि नाभिप्रदेशात् प्रयत्नप्रेरितः प्राणो
नाम वायुः ऊर्द्ध्वमाक्रमन् उरःप्रभृतीनि स्था-
नान्याहन्ति ततो वर्णस्य तदभिव्यञ्जकध्वनेर्व्वा-
त्पत्तिस्तत्रोत्पत्तेः। प्राक्जिह्वाग्रोपाग्रमध्यमूलानि
वर्णोत्पत्तिस्थानं ताल्वादि यदा सम्यक् स्पृशन्ति
तदा स्पृष्टता ईषत्स्पर्शे ईषत्स्पृष्टता समी-
पावस्थाने संवृतता दूरावस्थाने विवृतता अतएव
इचुयशानां तालव्यत्वाविशेषेऽपि चवर्गे उच्चा-
रयितव्ये जिह्वाग्रादीनां तालुस्थानेन सम्यक् स्पर्शः
यकारे ईषत् स्पर्शः शकारेकारयोः समीपदू-
रावस्थानं। स्पृष्टं प्रयतनमिति यतेर्नपुंसके भवि
ल्युट्। प्रयत्नमित्यपपाठः नडन्तस्य पुंस्त्वात्।

"शेषाः स्पृष्टा हलप्रोक्ताः" इत्यादि। यथा,
शिक्षायां शब्देन्दुसारः। तथाहि "अचोऽस्पृष्टाः
यणस्त्वीषत् नेमस्पृष्टाः शलः स्मृताः। "शेषाः
स्पृष्टाः हलप्रोक्ताः" इत्यादि। अत्र अचः
अस्पृष्टाः स्पर्शाभावरूपविवृतत्ववन्तः यणस्त्वीषत्
अस्पृष्टा इत्यनुषज्यते तेन ईषदस्पृष्टा ईषद्विवृता
इत्यर्थः। नेम इत्यर्द्धे तेन शलः ईषत् विवृताः
यणमपेक्ष्याधिकविवृतत्ववन्त इत्यर्थः। अपि च—
"अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम्। हो-
तारं रत्नधातमम्"। ईले इत्येतत् समस्तमपि-
पदमनुदात्तम् "तिङ्ङतिङः" इति सूत्रेण अति-
ङन्तादग्निशब्दात् परस्य ईल इति तिङन्तस्य
निघातविधानात् अग्निमीळ इति पदयोः सं-
हिताकाले तु धातुगतस्य ईकारस्य स्वरितत्वम्
"उदात्तादनुदात्तस्य स्वरितः" इति सूत्रेण उदात्तात्
परस्यानुदात्तस्य स्थाने स्वरितः स्यात् इत्यर्थकेनानु-
दात्तस्य ईकारस्य स्थाने स्वरितादेशात् ततःपरस्य
ले इत्यत्र एकारस्य तिङ्प्रत्ययरूपस्य स्वरितात्
संहितायाम् पूर्व्वस्यैकारस्य नितरां उदात्तत्वम्।
अपरञ्च ताल्वादिस्थानमाभ्यन्तरप्रयत्नइति सूच्य-
ते। अत्र मूलम् पाणिनीयशिक्षाग्रन्थे। यथा,—
"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू"।
"स्वराणामुष्मणाञ्चैव विवृतं करणं मतम्"।)
तस्य नामानि यथा,—
"इः सूक्ष्मा शाल्मली विद्या चन्द्रः पूषा सुगुह्यकः।
सुमित्रः सुन्दरो वीरः कोटरः काटरः पयः॥
भूमध्यो माधवस्तुष्टिर्दक्षनेत्रञ्च नासिका।
शान्तः कान्तः कामिनी च कामो विघ्नविनायकः॥
नेपालो भरणी रुद्रो नित्या क्लिन्ना च पावका"।
इति वर्णाभिधानतन्त्रम्॥ (मातृकान्यासेऽस्य
दक्षिणचक्षुषि स्थानम्। यथा, मातृकान्यास-
धृतमन्त्रः "इं नमो दक्षिणचक्षुषि ईं नमो
वामचक्षुषि"। इति।)
इ, } गतौ। (भ्वादिं-इणपक्षे अदां-परं-सकं-अनिट्।)
इ ल, } अयति। ल एति। पृथक्पाठसामर्थ्यात् पूर्व्वो
न लित्। शेषस्तु इण गतावित्ति प्रसिद्धः। यिणो-
ऽयणावित्यादिषु ग्रहणमस्यैव। इति दुर्गादासः॥
(उत्।) उदये। समुन्नतौ। यथा,—
"उदयति यदि भानुः पश्चिमे दिग्विभागे" इति।
(अभि+उत्।) अभ्युदये। समुन्नतौ। सर्व्वेगत्यर्था
ज्ञानार्थाः प्राप्त्यर्थाश्च इत्यनेन प्राप्त्यर्थोऽप्यस्य बहुलः
प्रयोगः। यथा,—मनुः।
"ब्राह्मणः श्रेष्ठतामेति प्रत्यवायेन शूद्रताम्"।
"अयमेति मन्दं मन्दं कावेरीवारिपावनः पवनः"।
इति साहित्यदर्पणम्। (अति) अतिक्रमे। परा-
भवे। यथा, हितोपदेशे। १।
"अतीत्य हि गुणान् सर्व्वान् स्वभावो मूर्द्धि वर्त्तते"।
"ततः परं जनस्थानं क्रोशत्रयमतीत्य वै"।
इति रामायणे। (अनु) अनुकरणम्।
"धातुरादेशमन्वेति तद्यथा हि तदर्पणः।
नात्माधीनो मनुष्योऽयं कालं भजति कञ्चन"॥
इति महाभारते। (अप) अपगमने। पलायने।

"प्रत्यादेशव्यलीकमपैतु ते"। इति शाकुन्तले।
(सम्+आ) सम्मिलने। "देवाश्चैतान् समेत्यो-
चुर्य्यायं वः शिशुरुक्तवान्"। इति मनुः। २।
१५२। इत्यादयो ज्ञेयाः।)
इ, ल, स्मृत्यां। (अदां-परं-सकं-अनिट्।) अधि-
पूर्व्वोऽयं। अधिग्रहणं अन्यपूर्व्वस्य केवलस्य च
प्रयोगनिरासार्थं। एवं सर्व्वत्र। ल अध्येति तव
लक्ष्मणः। इक स्मरणे इति प्रसिद्धोऽयं। इन्व-
दिक इत्यत्रास्यैव ग्रहणम्। इति दुर्गादासः॥
इ ङ ल अध्ययने। (अदां-आं-सकं-अनिट्।)
अधिपूर्व्वोऽयं। अध्ययनमर्थतः शब्दतश्च गुरुतो
ग्रहणं। ङ ल वेदमधीते विप्रः। इति दुर्गादासः॥
("यः स्वाध्यायमधीतेऽब्दं विधिना नियतः शुचिः"
इति मनुः।२।१०७।)
इ, व्य, भेदः। क्रोधोक्तिः। अपाकरणं। अनुकम्पा।
इति मेदिनी॥ खेदः। इति हेमचन्द्रः॥।
इंरेजः, पुं, लण्डदेशजातम्लेच्छजातिविशेषः। यथा,—
"अधिपा मण्डलानाञ्च संग्रामेष्वपराजिताः।
इंरेजा नव षट् पञ्च लण्ड्रजाश्चापि भाविनः"॥
इति मेरुतन्त्रे २३ प्रकाशः॥
इः, [स्] व्य, कोपः। सन्तापः। दुःखभावना। इति
शब्दरत्नावली॥
इः, पुं, (अस्य विष्णोः श्रीकृष्णस्यापत्यम् पुमान्।
अ+इञ्।) कामदेवः। इति पुरुषोत्तमहला-
युधौ॥ यथा, आग्नेये एकाक्षराभिधानम्।
"इः कामे रतिलक्ष्म्योरी उः शिवे ब्रह्मकाद्य ऊः"॥
इक्कटः, पुं, तृणविशेषः। तत्पर्य्यायः। बहुमूलः २।
इति त्रिकाण्डशेषः। कोशाङ्गः३ इत्कटः ४। इति
हारावली॥ (इत्कटशब्देऽस्य विशेषो ज्ञातव्यः॥)
इक्षुः, पुं, (इष्यते अभिलष्यतेऽसौ इति। इष्+क्सु।)
स्वनामख्यातवृक्षं। आक् इति भाषा। तत्पर्य्यायः।
रसालः २। इत्यमरः॥ कर्कोटकः ३ वंशः ४
कान्तारः५ सुकुमारकः६ अधिपत्रः ७ मधुतृणः ८
दृष्यः ९ गुडतृणः १०। इति राजनिर्घण्टः॥
मृत्युपुष्पः ११ महारसः १२ असिपत्रः १३ को-
शकारः १४ इक्षवः १५। इति शब्दरत्नावली॥
पयोधरः १६। इति जटाधरः॥*॥ तस्य भेदाः।
वंशकः १ कान्तारः २ भीरुः ३ पौण्ड्रः ४। इति
रत्नमाला॥ सामान्येक्षुगुणाः। रक्तपित्तनाशित्वं।
बलशुक्रकफकारित्वं। पाके मधुरत्वं। स्निग्धत्वं।
गुरुत्वं। शीतलत्वं। मूत्रशुद्धिकारित्वञ्च। तस्य
मूले अतिमधुरत्वं। मध्ये मधुरत्वं। ग्रन्थिनख-
ग्रभागेषु लवणरसत्वञ्च। इति राजवल्लभः॥
मूलादूर्द्ध्वं मधुरत्वं। मध्ये अतिमधुरत्वं। अग्र-
क्रमाल्लवणत्वं नीरसत्वञ्च॥ अभुक्ते इक्षुभक्षणगुणाः।
पित्तदाहत्वं। भुक्ते वातप्रकोपणत्वं। भुक्तिमध्ये
गुरुतरत्वञ्च॥ इति राजनिर्घण्टः॥ दन्तनिष्पी-
ड़ितेक्षुरसगुणाः। हिमत्वं। शुक्रकारित्वं। इति
जनकत्वम्। जीवनहितकारित्वम्। वायुरक्तपित्त
नाशित्वं। स्वादुत्वं। स्निग्धत्वं। शीतिदाहत्वं। रक्त-
वर्द्धकत्वं। सुखप्रह्लादकारित्वं। धातुवर्द्धकत्वञ्च।
इति राजवल्लभः॥ अपि च। रक्तदोषभ्रमश्रम-